दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णपञ्चमी
कार्तिक 14 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-09 ■ वर्ष-6 ■ अङ्क-06 | 1 | अक्तूबर 30, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 शीर्षयतीनां मार्गदर्शने भविष्यति सनातन-शास्त्रशुद्ध्यभियानस्य शुभारम्भः -स्वामी रामदेवः

3 अस्माकं महतः पूर्वजान्, देवी-देवताः, अवतारीसन्ताः च प्रत्यारोप्य कलङ्कयितुं प्रचलति षड्यन्त्रम् - स्वामी रामदेवः

9 हाइलो-ओपन्-कन्दुकक्रीडा (बैडमिण्टन्) २०२६: पी.वी. सिन्धुः, मालविका बंसोड़, उन्नति-हुड्डा च षोडश-चक्रे स्थानम् अलभन्त

52th AIOC - प्राचीनज्ञानसम्पदः संरक्षणस्य, संवर्धनस्य, समकालीनजीवने च तस्याः प्रासङ्गिकतायाः अवबोधनस्य महत्त्वपूर्णावसरम् एतद् सम्मेलनम् - राज्यपालः डॉ. बिसेनः



वयं वेदान् जीवन्तः स्मः, वयं रामत्वं कृष्णत्वं शिवत्वं च जीवामः - परमश्रद्धेयः स्वामी रामदेव-महाराजः

अखिलभारतीय-प्राच्यविद्या-सम्मेलनं केवलं कोऽपि शैक्षणिकोत्सवः नास्ति, सनातनस्य गौरवस्य पुनर्प्रतिष्ठापनाय युगान्तरकारिणः सङ्कल्पस्य प्रारम्भः वर्तते - आचार्य-बालकृष्ण-महाराजः

हिमसंस्कृतवार्ता- डॉ रेणुका बोकारे,हरिद्वारम्।

पतञ्जलिविश्वविद्यालये आयोज्यमानस्य त्रिदिवसीयस्य द्विपञ्चाशत्तमस्य (५२) अखिलभारतीय-प्राच्यविद्या-सम्मेलनस्य (AIOC) समुद्घाटनम् उत्तराखण्डस्य राज्यपालेन डॉ. ढालसिंहबिसेन-महोदयेन दीपप्रज्वालनेन विहितम्। अस्मिन् अवसरे पतञ्जलिविश्वविद्यालयस्य कुलाधिपतेः परमश्रद्धेयस्य स्वामि-रामदेव-महाराजस्य तथा च कुलपतेः परमपूज्यस्य आचार्य-बालकृष्ण-महाराजस्य पावनं सान्निध्यम् आसीत्। कार्यक्रमे माननीय-राज्यपालमहोदयेन स्वसन्देशे प्रतिपादितं यत् भारतीयज्ञानपरम्परायाः मूलम् उद्देश्यं मानवस्यान्तः विवेकस्य, समाजे सौहार्दस्य, समग्रसृष्टिं प्रति च कल्याणकारिण्याः दृष्टेः विकासः अस्ति। सः अवदत् यत् इदं सम्मेलनम् अस्माकं प्राचीनज्ञानसम्पदः संरक्षणस्य, संवर्धनस्य, साम्प्रतिकजीवने च तस्याः उपादेयतायाः अवबोधनस्य महत्त्वपूर्णः अवसरः वर्तते। अस्मिन् ५२-तमे अधिवेशने देशविदेशयोः विदुषां सहभागिता भारतीयमनीषायाः अमूल्यन्यासं प्रति व्यापिकामभिरुचिं प्रदर्शयति। सः दृढविश्वासं प्राकटयत् यत् अत्र सम्पत्स्यमानः विद्वत्संवादः, शोधविमर्शः, भारतीयविचाराणां विनिमयश्च भारतीयज्ञानपरम्परायै अध्ययनाय च नूतनां दिशं प्रदास्यति। अद्य अस्मिन् अवसरे 'भारतीयदर्शनानाम् इतिहासः मीमांसा च', 'वेदामृतम्', 'भारतीयदर्शनबोधः' सदृशीनां कृतीनां लोकार्पणम् अपि भारतीयज्ञानसाधनायाः समृद्धां परम्परां समेधयितुम् एकः प्रयासः अस्ति।

वयं स्वधर्मस्य, संस्कृतेः, प्राचीनविद्यानां च संरक्षणं कुर्याम - राज्यपालः

राज्यपालमहोदयः प्रावोचत् यत् भारतीयचिन्तनस्य इयं विशिष्टिः यद् अत्र ज्ञानस्य लक्ष्यं केवलं बौद्धिकोन्नतिः न, अपि तु व्यक्तेः सामाजिकचरित्रस्य, व्यवहारस्य, सामाजिकोत्तरदायित्वस्य च परिष्कारः अपि वर्तते। अस्माकम् आचार्यैः व्याकरणे, तर्कशास्त्रे, गणिते, खगोलविज्ञाने, पराविद्यायां, ज्योतिषे, आयुर्वेदे, योगे, वास्तुशास्त्रे, दर्शनादिषु चानेकेषु क्षेत्रेषु स्वयोगदानं समर्पितम्। महर्षेः पाणिनेः व्याकरणपरम्परा, महर्षेः पतञ्जलेः योगदर्शनम्, आयुर्वेदस्य च समृद्धिमती परम्परा भारतीयबौद्धिकसामर्थ्यस्य महत्त्वपूर्णाः दृष्टान्ताः सन्ति। सम्मेलने पतञ्जलिविश्वविद्यालयस्य कुलाधिपतिना परमश्रद्धेयेन स्वामि-रामदेव-महाराजेन उक्तं यत् त्रिंशत्तमे (३०) अक्टोबर् दिनाङ्के सम्मेलने भारतीयविद्वत्परिषत्, अखिलभारतीय-अखाड़ा-परिषत्, अखाड़ानां प्रमुखाः, जगद्गुरु-रामानन्दाचार्याः, जगद्गुरु-शङ्कराचार्याः, जगद्गुरु-रामानुजाचार्याः, आदिगुरुशङ्कराचार्यस्य प्रतिनिधिभ्यः आरभ्य भारतस्य समग्रायाः गुरुपरम्परायाः प्रतिनिधयः अस्मिन् सम्मेलने स्वयं भागं ग्रहीष्यन्ति अथवा अन्तर्जालमाध्यमेन (ऑनलाइन) संलग्नाः भविष्यन्ति।

अद्यतनीयं सुभाषितम्

असूयैकपदं मृत्युः,अतिवादः श्रियो वधः।
अशुश्रूषा त्वरा श्लाघा,विद्यायाः शत्रवस्त्रयः॥

भावार्थः- जो द्वेष करने वाला होता है उसके लिए पद पद पर मृत्यु है, जो अधिक बोलने वाला है उसका धन नाश होता है और जिसमें सेवाभाव की कमी है (अशुश्रूषा), जिसमें धैर्य की कमी है (त्वरा) और जो स्वयं की प्रशंसा करता है। ये तीनों गुण विद्या के शत्रु हैं। जिनमें ये गुण होते हैं वे विद्या की प्राप्ति नहीं कर सकते।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११ कार्यालयीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्तायां दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्राकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा



शीर्षयतीनां मार्गदर्शने भविष्यति सनातन-शास्त्रशुद्ध्यभियानस्य शुभारम्भः -स्वामी रामदेवः





स्वामिना उक्तं यत् केचन जनाः अज्ञानाद् अविवेकाच्च सनातनस्य खण्डितं रूपम् उपस्थापयन्ति। 'मन्दिरे एव भगवान् अस्ति' इति कथनेन भगवतः स्वरूपं खण्डितं भवति, यतो हि भगवान् तु सर्वव्यापकः, भगवान् समग्ररूपेणैव द्रष्टव्यः। अद्य कृत्रिमबुद्धेः (AI) युगं वर्तते, केचन जनाः सनातनं खण्डितरूपेण प्रस्तौति, शास्त्राणाम् अशुद्धां व्याख्यां कुर्वन्ति। कश्चिद् वदति यत् श्रीरामः सीतामाता च मांसभक्षणं मद्यपानं च कृतवन्तौ। केषाञ्चित् मूर्खाणां धूर्तानां च व्याख्यानानां कारणात् काभिश्चित् संस्थाभिः पुस्तकानि मुद्रितानि। अनेन मर्यादापुरुषोत्तमस्य रामस्य मर्यादा कुत्र गता, सीतायाः तपः सतीत्वं च कुत्र गतम्? योगेश्वरं भगवन्तं श्रीकृष्णं रासलीलानां नाम्नि न जाने किम्-किम् उक्तम्, तां वीभत्सतां कोऽपि पठितुम् अपि न शक्नोति। तथैव शिवः मादकद्रव्यसेवी (नशेड़ी, गजेड़ी) कथितः; यस्मिन् शिवे कपटेन समर्पितं जलम् अपि न स्वीक्रियते, तस्मै भङ्गं धत्तूरं च किमर्थम् अर्पयथ? एवमेव ऋषीणाम् ऋषिकाणां देवी-देवतानां चापि अपमानः कृतः। सनातनविरोधिनः प्रतिदिनम् अस्मान् अप्रासङ्गिकान्, अवैज्ञानिकान्, अव्यावहारिकान्, मूर्खांश्च उक्त्वा उपहसन्ति। किन्तु वयं सङ्कल्पं कृतवन्तः यद् अधुना कोऽपि सनातनस्य उपहासं कर्तुं न शक्ष्यति। एषः पुरुषार्थः पतञ्जलितः विधास्यते। केनापि कारणेन यदि केनापि अशुद्धा व्याख्या कृता, कश्चन प्रक्षेपः कृतः, पूर्वजानां महतीषु कृतिषु लाञ्छनं वा रोपितं, तर्हि तत् पतञ्जलितः शुद्धीकरिष्यते। तेषाम् एव कारणेन अयं महान् सनातनधर्मः अस्माकं मध्ये तिष्ठति। स्वामी जी अवदत् यत् चत्वारो वेदाः, रामायण-महाभारते, सर्वाणि पुराणानि, राम-कृष्ण-शिवाश्च अस्माकम् अन्तरेव निवसन्ति; वयं वेदान् जीवन्तः स्मः, वयं रामत्वं कृष्णत्वं शिवत्वं च जीवामः। अस्माभिः सर्वैः सनातनस्य विग्रहवान् स्वरूपः भवितव्यम्। आगामिनि समये सनातनः स्वकीये शुद्धतमे स्वरूपे आगमिष्यति। यदि कश्चन सनातनस्योपरि प्रश्नम् उत्थापयिष्यति, तर्हि वयं विधितः (कानूनीदृष्ट्या) अपि तं दण्डयिष्यामः। अस्माकं देशस्य संविधानं कथयति यद् अत्र कोऽपि भेदो न भवितुम् अर्हति। "वयम् भारतस्य जनाः" (We the people of India), "वयम् आर्यावर्तस्य भारतवर्षस्य वा जनाः"। वयं भारतस्य सर्वे नागरिकाः समानाः स्मः। ब्राह्मण-क्षत्रिय-वैश्य-अनुसूचितजाति-जनजाति-ओबीसी-दलित-शोषित-आदिवासिनः सर्वे एकाः एव। वयं सर्वे तस्यैकस्यैव ब्रह्मणः सन्ततयः स्मः। कोऽपि जनः अस्माकं भगवति, सनातनधर्मे, संस्कृतौ च प्रश्नं कथम् उत्थापयितुं शक्नोति? अस्माभिः सङ्कीर्णभावेन न जीवितव्यम्, आत्मानं खण्डयित्वा न स्थातव्यं यत् 'अहं कस्याश्चित् पतिः अस्मि', 'अहं कस्यचित् पत्नी अस्मि', 'अहं ब्राह्मणः अस्मि', 'अहं क्षत्रियः अस्मि'; इदं तु खण्डितं व्यक्तित्वम्। येनापि वेदोऽधीतः स ब्राह्मणं क्षत्रियं वैश्यं वा खण्डितं न पश्यति। सः कथयति यद् 'ममान्तः ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः सन्ति, ममान्तः चत्वारो वेदाः सन्ति, समग्रं ब्रह्माण्डं चास्ति'। स्वामि-महाराजेन उक्तं यत् जनाः मां पृच्छन्ति—'भवतः का जातिः? भवान् ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः, ओबीसी, अनुसूचितजातिः, आदिवाँसी वा किम् अस्ति?' अस्माकं त्विदमेव प्रत्युत्तरं भवति यत् प्रथमं तु वयं भारतवासिनः स्मः, मानवाः स्मः; अपमानम् उन्मूलयामः अतः ब्राह्मणाः स्मः; अन्यायम् अपनयामः अतः क्षत्रियाः स्मः; अभावं दूरीकुर्मः अतः वैश्याः स्मः; सेवां च कुर्मः अतः शूद्राः न अपि तु महाशूद्राः स्मः। वयं भारतस्य संविधानं, लोकतन्त्रं, साक्षाद् भारतं च स्मः; अस्मासु वेदाः सन्ति, सनातनः अस्ति, अस्माकम् अन्तः भारतं निवसति। स्वामी जी प्रावोचत् यद् अस्मिन् सम्मेलने देशविदेशेभ्यः छात्राः अनुसन्धानाय अध्ययनाय च समागताः सन्ति; 'भारतीय-शिक्षा-बोर्ड'-माध्यमेन मैकॉले-प्रवर्तितायाः शिक्षायाः भारतं मोचयितुम् अस्माकम् उद्देश्यं वर्तते।

सम्मेलनं सनातनस्य गौरवस्य पुनर्प्रतिष्ठापनाय युगान्तरकारिणः सङ्कल्पस्य प्रारम्भः वर्तते - आचार्य-बालकृष्ण-महाराजः

सम्मेलने परमपूज्येन आचार्य-बालकृष्ण-महाराजेन उक्तं यद् अखिलभारतीय-प्राच्यविद्या-सम्मेलनं केवलं कोऽपि शैक्षणिकोत्सवः नास्ति, अपि तु श्रद्धेय-स्वामि-महाराजस्य नेतृत्वे यम् इतिहासम् अत्र वयं लेखितुं प्रवृत्ताः स्मः, सः सनातनस्य तं गौरवं पुनः प्रतिष्ठापयितुम् एकस्य युगान्तरकारिणः सङ्कल्पस्य प्रारम्भः अस्ति। आचार्यचरणैः उक्तं यद् अत्र संस्कृतेः, शास्त्रस्य, समयेन सह शास्त्रेषु वर्धमानस्य वैचारिकप्रदूषणस्य च विषये चर्चा भविष्यति। तेषां शास्त्राणां विषये चर्चा भविष्यति यानि विकृतयितुं जनैः कुत्सितः प्रयासः विहितः, सहैव तेषां सम्पूर्णसमाधानेऽपि गम्भीरविमर्शः भविष्यति। वयं सर्वे जानीमः यद् अस्माकं सनातनवाङ्मयं यद्यपि अगाधं निष्कलङ्कं च अस्ति, तथापि मध्यकालस्य आघातैः, वैदेशिकाक्रान्तृभिः, कुटिलषड्यन्त्रकारिभिः, सङ्कीर्णमानसिकतया च अस्माकं मूलग्रन्थेष्वपि तादृशाः भ्रामकाः विषयाः प्रक्षिप्ताः ये ऋषीणां मूलचिन्तनस्य, सामाजिकसमरसतायाः, विश्वकल्याणभावनायाश्च विपरीताः सन्ति। एतान् एव प्रक्षेपान् आधारीकृत्य अस्माकं महतीं संस्कृतिं कलङ्कयितुं कुत्सितं षड्यन्त्रं प्रचलति। अस्माकं पूज्यैः यतिभिः समाजस्य च मनीषिभिः एव अस्माकं संस्कृतेः तस्याः गौरवस्य च पुनः प्रतिष्ठापनं कर्तुं शक्यते। निश्चितरूपेण यदि वाक्यं तर्कस्य, न्यायस्य, सार्वभौमिकसत्यस्य च निकषे शुद्धं न सिद्ध्यति, तर्हि तत् ऋषिवचनं शास्त्रसम्मतं वा भवितुं नार्हति। आचार्यचरणैः विज्ञापितं यत् श्रद्धेय-स्वामि-महाराजस्य नेतृत्वे पतञ्जलितः नूतनशास्त्रनिर्माणस्य महत् कार्यं क्रियते। पतञ्जलिना अनेकेषां विदुषां सहयोगेन लक्षाधिकानां श्लोकानां रचनां कृत्वा आयुर्वेदस्य, योगस्य, वनस्पतीनाम्, आयुर्वेदनिदानस्य च क्षेत्रेषु उल्लेखनीयं कार्यं विहितम्। शास्त्रस्य आधुनिकसमयस्य च मध्ये विद्यमानं व्यवधानं दूरीकर्तुं कार्यम् अपि पतञ्जलितः एव क्रियते। पतञ्जलिविश्वविद्यालयः अनेन पावनेन सङ्कल्पेन अग्रे सरति यद् वयम् आधुनिकविज्ञानस्य दृष्ट्या सनातनस्य च प्रज्ञया अस्य राष्ट्रस्य पुनर्निर्माणं विधास्यामः। ऋषीणां मूलज्ञानं वयम् अकाट्यं मन्यामहे, किन्तु तेषां नाम्नि समाजे आरोपिताः कुरीतयः प्रक्षिप्ताः श्लोकाश्च प्राच्यविद्यायाः मूलसन्देशरूपेण न मन्तव्याः।



अस्माभिः प्राच्यविद्यायाः अपि अग्रे गत्वा 'भारतविद्या' प्रति गन्तव्यम् - प्रो. श्रीनिवास-वरखेडी

सम्मेलनस्य अध्यक्षैः केन्द्रीयसंस्कृत-विश्वविद्यालयस्य च कुलसचिव-कुलपति-चरणैः प्रो. श्रीनिवास-वरखेडी-महोदयैः उक्तं यद् यदा वैदेशिकाः भारते अध्ययनाय आगताः तदा ते विस्मिताः अभवन्, प्रथमावलोकने भारतं तेषां बोधगम्यं नाभवत्। तदा भारतीयैः विद्वद्भिः विचारितं यद् अनेन भारतस्य विरूपता न स्याद् इत्यनेनैव उद्देश्येन तैः अखिलभारतीय-प्राच्यविद्या-सम्मेलनस्य शुभारम्भः कृतः। स्वातन्त्र्यात् पूर्वम् आङ्ग्लशासने इदम् 'ऑल इण्डिया ओरियण्टल कॉन्फ्रेन्स' (AIOC) इति नाम्ना उच्यते स्म; किन्तु यदि भारतीयपरिप्रेक्ष्ये द्रष्टव्यं तर्हि भारतीयदृष्टिः अपि तत्र समावेष्टव्या, अन्यथा भारतस्य अपूर्णम् अखण्डं च दर्शनमेव स्यात्। तैः प्रस्तावम् उपस्थाप्य अस्मिन् संशोधनस्यानुरोधः कृतः, उक्तं च यद् अद्य स एव अवसरः यदा वयं 'ओरियण्टल्'-शब्दस्य स्थाने 'प्राच्यविद्या'-शब्दस्य प्रयोगं कुर्याम। अस्माभिः प्राच्यविद्यायाः अपि अग्रे गत्वा 'भारतविद्या' प्रति गन्तव्यम्।

अखिलभारतीय-प्राच्यविद्या-परिषदः महासचिवया प्रो. कविता-होले-महोदयया एआईओसी (AIOC)-संस्थायाः गौरवमयीं परम्परां प्रतिपादयन्त्या उक्तं यद् इदं भारतस्य समृद्धायाः, प्राचीनायाः, समुज्ज्वलायाश्च परम्परायाः एकं गौरवपूर्णं मञ्चम् अस्ति। तया विज्ञापितं यत् परिषदः स्थापनायाः उद्देश्यं भारतस्य प्राचीनज्ञानपरम्परायाः, संस्कृतसाहित्यस्य, भारतीयदर्शनस्य, इतिहासस्य, धर्माभिलेखस्य, पाण्डुलिपीनां च व्यवस्थितम् अनुसन्धानं प्रोत्साहयितुं वर्तते। अस्मिन् अवसरे राज्यपालमहोदयेन 'भारतीयदर्शनानाम् इतिहासः मीमांसा च', 'वेदामृतम्', 'भारतीयदर्शनबोधः' इति पुस्तकानां विमोचनम् अपि विहितम्।

शास्त्रार्थविशेषपटलेन (पैनल) शोधपत्रप्रस्तुतिभिश्च समृद्धं जातं सम्मेलनम् २९ तः ३१ अक्टोबर् २०२६ यावत् आयोजितेऽस्मिन् सम्मेलने पूर्णसत्रैः सह विशेषपटलचर्चाः (पैनल-चर्चाः), शोधपत्रप्रस्तुतयः, भित्तिपत्रप्रस्तुतयः (पोस्टर-प्रस्तुतयः) तथा च 'महर्षिपतञ्जलिसभा', 'ब्रह्मवादिनीसभा' सदृशानि समानान्तरसत्राणि आयोजितानि। प्रथमदिवसस्य कार्यक्रमे प्रातः योगगुरोः स्वामि-रामदेव-महाराजस्य सान्निध्ये योगसत्रं, पुस्तकमेलायाः उद्घाटनं, सम्मेलनस्य समुद्घाटनं, प्रथमं पूर्णसत्रं च समाविष्टानि आसन्। अपराह्णे 'मूल-स्वामिनारायण-दर्शनम्' इति विषये विशेषपटलचर्चया सह विविधाः शोधपत्र-भित्तिपत्रप्रस्तुतयः सम्पन्नाः।

एतेषु सत्रेषु संस्कृतस्य, वेदस्य, दर्शनस्य, इतिहासस्य, साहित्यस्य, भारतीयज्ञानपरम्परायाश्च विविधायामेषु विचारविमर्शः क्रियते। सम्मेलनस्य उद्देश्यं प्राचीनभारतीयज्ञानन्यासस्य प्रामाणिकाध्ययनं प्रोत्साहयितुं, संस्कृतस्य संवर्धनं वेगेन विस्तारयितुं, पारम्परिकज्ञानं चाधुनिकशिक्षा-अनुसन्धानाभ्यां सह संयोजयितुम् अस्ति।

कार्यक्रमावधौ राज्यपालेन डॉ. ढालसिंहबिसेन-महोदयेन भव्यस्य पुस्तकमेलायाः उद्घाटनं विहितम्। पुस्तकप्रकोष्ठैः सुसज्जितायाम् अस्यां मेलायां भारतीयज्ञानपरम्परायाः, संस्कृतसाहित्यस्य, दर्शनस्य, वैदिकवाङ्मयस्य, आयुर्वेदस्य, प्राच्यविद्यायाश्च सम्बद्धानां ग्रन्थानां प्रदर्शनं कृतम्।

अस्मिन् कार्यक्रमे भारतीयविद्वत्परिषदः अध्यक्षाः आचार्य-वीरनारायण-पाण्डुरङ्गी-महोदयाः, श्री-गणेश-उमाकान्त-थीटे-महोदयाः, एआईओसी-संयुक्तसचिवः प्रो. शिवानी-महोदया, त्रयोविंशतेः (२३) विश्वविद्यालयानां कुलपतयः, पतञ्जलिविश्वविद्यालयस्य प्रतिकुलपतिः साध्वी डॉ. देवप्रिया-महोदया, मानविकीसङ्कायाध्यक्षाः श्री-मयङ्क-अग्रवाल-महोदयाः, पतञ्जलिपरिवारस्य ज्येष्ठाः सदस्याः, संन्यासिनः भ्रातरः, संन्यासिन्यः भगिन्यः, सर्वेषां प्रभागमुख्याः, विभागाध्यक्षाः, कर्मयोगिनः, पतञ्जलिविश्वविद्यालयस्य प्राचार्याः, छात्राश्च उपस्थिताः आसन्।

हरियाणा-संस्कृत-विद्यापीठस्य आचार्यस्य राधावल्लभशर्मणः
'नाट्यशास्त्रसर्वस्वम्' इति ग्रन्थस्य योगर्षिणा स्वामिना रामदेवेन कृतं लोकार्पणम्



हिमसंस्कृतवार्ता पतञ्जलियोगपीठम् २९ अक्तू. हरियाणा-संस्कृत-विद्यापीठस्य (बगौला, पलवल) साहित्यविभागस्य लब्धप्रतिष्ठैः आचार्यैः डॉ. राधावल्लभशर्मभिः विरचितस्य 'नाट्यशास्त्र-सर्वस्वम्' इति महत्त्वपूर्णस्य नूतनग्रन्थस्य भव्यं लोकार्पणं योगर्षिणा पूज्यपाद-स्वामिना रामदेवेन सम्पन्नम्। अस्य ग्रन्थस्य प्रथमतः अष्टादशाध्यायान् यावत् पूर्वार्धभागः अतीव सरलायां सुबोधायां च संस्कृतभाषायां प्रकाशितो वर्तते। भरतमुनिप्रणीतस्य नाट्यशास्त्रस्य गूढाः क्लिष्टाश्च विषयाः ग्रन्थेऽस्मिन् अत्यन्तं सुगमरीत्या प्रतिपादिताः सन्ति। ग्रन्थस्य प्रमुखं वैशिष्ट्यमिदं यत् अत्र अभिनयस्य सर्वेषां प्रकाराणां मुद्राणां च सचित्राणि विवरणानि सन्निविष्टानि, येन अध्येतृणां कृते विषयबोधः अत्यन्तं सुलभः जातः। एषा कृतिः संस्कृत-अध्ययनरतानां छात्राणां, नाट्यकलाजिज्ञासूनां शोधच्छात्राणां च कृते अतीव लाभप्रदा, उपादेया, मार्गदर्शिका च सिद्धा भविष्यति। ध्यातव्यं यत् अवसरे अस्मिन् अनेकेषां विदुषां ग्रन्थानां लोकार्पणं जातम्।

पुस्तकस्य लोकापर्णानन्तरं वार्ताकारान् सम्बोधयन् डॉ.राधावल्लभशर्मणा उक्तं यत् नाट्यशास्त्रम् शास्त्री-आचार्यादीषु कक्षासु भारते प्रायः बहुषु विश्वविद्यालयेषु पाठ्यते। छात्राः कदाचित् अस्मिन् विषये काठिन्यमनुभवन्ति, अतः छात्राध्ययनदृष्ट्या पुस्तकस्य विषयवस्तु निबद्धा वर्तते। तेनोक्तं यत् शीघ्रमेव पुस्तकमिदं पुस्तकविक्रयकेन्द्रेषु उपलब्धा भविष्यति। अस्मिन् गरिमामये लोकार्पण-अवसरे पतञ्जलियोगपीठस्य महामंत्री श्रद्धेयः आचार्यः बालकृष्णमहोदयः, स्वयं योगर्षिः स्वामी रामदेवः, प्रख्याताः वैयाकरणाः आचार्य-बृजभूषण-ओझामहोदयाः तथा च श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य भूतपूर्वकुलपतयः प्रो. सुकान्तकुमारसेनापतिवर्याः उपस्थिताः आसन्। सर्वेऽपि विद्वांसः ग्रन्थस्य उपादेयतां प्रशंसन्तः ग्रन्थकाराय डॉ. राधावल्लभशर्मणे हार्दं साधुवादं शुभाशंसां च प्राददुः।

हिन्दमहासागर-क्षेत्रे विशाले हिन्द-प्रशान्त-परिक्षेत्रे च भारतं विश्वसनीय सुरक्षा-प्रदातृत्वेन कार्यं कुर्वत् स्थास्यति - रक्षामन्त्री



रक्षामन्त्री राजनाथ सिंहः उक्तवान यत् भारतं हिन्द महासागर-क्षेत्रे अथ च विशाले हिन्द-प्रशान्तक्षेत्रे विश्वसनीयं नेट्-सुरक्षा-प्रदातृ-राष्ट्र भूत्वा स्वकीयां भूमिकां निरन्तरं निर्वक्ष्यति। फिलिपीन्स-देशस्य सेबू-नगरे आयोजिते त्रयोदशे आसियान-रक्षामन्त्रि सम्मेलने ए.डी.एम. एम.प्लस् इत्यस्मिन सम्बोधनं कुर्वन् श्रीसिंहः अवदत् यत् भारतं सामुद्रिक-सुरक्षां समग्रक्षेत्रस्य शान्ति-सुरक्षा-समृद्धिभिः सह सम्बद्धां मन्यते। तेन प्रतिपादितं यत् अस्य वर्षस्य ए.डी.एम.एम.प्लस् सम्मेलनस्य मुख्य-विषयः सहैव भूत्वा अस्माकं भविष्यस्य दिशा-निर्धारणम् भारतस्य रक्षा-विदेश नीतिभ्यां सह गभीरतया संयुक्ततां भजते। मन्त्रिणा पुनः स्पष्टीकृतं यत् विधि-शासने, विशेषतः संयुक्तराष्ट्र-समुद्री-विधि-सन्धौ भारतस्य दृढाग्रहः अथ च नौ-सञ्चारस्य गगन सञ्चारस्य च स्वतन्त्रतायाः समर्थनं कस्मिंश्चिदपि देशे लक्षितं नास्ति ।

गृहमन्त्री-अमितशाहः अर्नब-चक्रवात-प्रभावित-राज्यानां मुख्यमन्त्रिभ्यः सर्वसम्भव साहाय्यस्य आश्वासनं दत्तवान्



केन्द्रीय-गृहमन्त्री अमितशाहः अर्नब-चक्रवातस्य प्रभावम् आलोक्य आन्ध्रप्रदेशस्य, पुडुचेर्याः, ओडिशायाः अथ च छत्तीसगढ़-राज्यस्य मुख्यमन्त्रिभिः सह दूरभाष-माध्यमेन सम्भाषणं विहितवान्। गृहमन्त्रिणा आपद्ग्रस्त नागरिकाणां कष्टनिवारणाय सर्वप्रकारकस्य केन्द्रीय-साहाय्यस्य आश्वासनं प्रदत्तम् । सामाजिक-सञ्चार-पटले गृहमन्त्री अवदत् यत् एनडीआरएफ अथ एसडीआरएफ बलानि तत्परतया कार्यरतानि सन्ति, युद्ध-स्तरे च आपदुद्धरणकार्याणि निरन्तरं कुर्वन्ति। अपरत्र श्रीशाहः संसूचितवान् यत् चक्रवातस्य क्षतेः आकलनार्थम् अग्रे च आवश्यक-साहाय्यस्य मूल्याङ्कनाय शीघ्रमेव एकं मन्त्रालयान्तर-केन्द्रीय-दलं एतेषु राज्येषु प्रेषयिष्यते। तेन दृढतया प्रतिपादितं यत् केन्द्र-सर्वकारः दृढसङ्कल्पेन सह संकटापन्नानां जनानां पार्श्वे तिष्ठति ।

अमेरिका-देशेन सह प्रस्तावित-व्यापार-सन्धिना कृषकाणां हितानां रक्षणं भविष्यति, देशाय प्रतिस्पर्धात्मकं सामर्थ्य च प्राप्स्यते - केन्द्रीय-वाणिज्य-उद्योगमन्त्री



केन्द्रीय-वाणिज्य-उद्योगमन्त्री पीयूष गोयलः प्रतिपादितवान् यत् संयुक्त-राज्य-अमेरिका-देशेन सह भारतस्य प्रस्तावितः व्यापार-सन्धिः कृषकाणां हितानि संरक्षिष्यति अथ च वैश्विक विपणौ भारतस्य प्रतिस्पर्धात्मकं सामर्थ्यं वर्धयिष्यति। नवदेहल्याम् आयोजिते भारतस्य औद्योगिक-रूपान्तरण-विषयके चतुर्थे राष्ट्रिय सम्मेलने सम्बोधनं कुर्वन् श्रीगोयलः दृढतया अवदत् यत् एषः व्यापार-सन्धिः सर्वथा न्यायसङ्गतः, सन्तुलितश्च भविष्यति ।

राष्ट्रीय-औषध-मूल्य-निर्धारण-प्राधिकरणेन कर्कट रोगस्य त्रिचत्त्वारिंशदधिकचतुश्शतं ब्राण्ड्-औषधानां

परिष्कृतेन अधिकतम-विक्रय-मूल्येन सह एका नूतना सूची प्रकाशिता



राष्ट्रीय-औषध-मूल्य-निर्धारण-प्राधिकरणेन कर्कट रोगस्य त्रिचत्त्वारिंशदधिकचतुश्शतं ब्राण्ड्-औषधानां परिष्कृतेन अधिकतम-विक्रय-मूल्येन सह एका नूतना सूची प्रकाशिता। एतानि परिष्कृतानि अधिकतम-विक्रय-मूल्यानि आगामि-मासस्य नवम-दिनाङ्कात प्रभावीनि भविष्यन्ति। अस्यां परिष्कृत-मूल्य-सूच्याम् औषध निर्माणक-समवायैः अस्य मासस्य सप्तविंशति-दिनाङ्क यावत् समर्पिता सूचना समाविष्टा अस्ति। प्राधिकरणेन स्पष्टीकृतं यत् यदा-यदा निर्माणकर्तारः अशासकीय-अनुसूचित कर्कट-रोग-औषधानां परिष्कृत-मूल्यानि समर्पयिष्यन्ति, तदा-तदा इयं सूची अद्यतनीकृता भविष्यति। रसायन-उर्वरक-मन्त्रालयस्य आधिकारिक विज्ञप्त्यनुसारं कतिपयेषु प्रमुखेषु कर्कट-रोग औषध-ब्राण्ड्-मूल्येषु महती न्यूनता आगता अस्ति, येन रोगिभ्यः महत् साहाय्यं प्राप्स्यते।

प्रधानमन्त्री नरेन्द्रमोदी अद्यारभ्य गुजरातराज्यस्य द्विदिवसीय यात्रायां भविष्यति



प्रधानमन्त्री नरेन्द्रमोदी अद्यारभ्य गुजरातराज्यस्य द्विदिवसीय यात्रायां भविष्यति। श्रीमोदी बनासकांठानगरे चतुर्दश-सहस्रकोटि-रूप्यकाणां विविधविकासपरियोजनानां शिलान्यासं, उद्घाटनं, राष्ट्राय समर्पयिष्यति। अहमदाबाद मेट्रो फेज-2ए (विमानस्थानकस्य विस्तारः) तथा फेज-2बी (गिफ्ट सिटी एक्स्टेन्शन) इत्येतयोः शिलान्यासोऽपि विधास्यति। सः पी.एम. किसान योजनायाः अन्तर्गतं एकोनविंशति-सहस्रकोटि-रूप्यकाणां विमोचनम अपि करिष्यति। सः बनासकांठानगरे एम्ब्रियो ट्रान्सफ़र टेक्नालॉजी-इन विट्रो फर्टिलाईजेशन प्लेबोरेटरी अपि च भारत। बोवाइन ब्रीडिङ्ग एण्ड रिसर्च सेण्टर कैटल फार्म इत्यत्र अपि गमिष्यति। शनिवासरे प्रधानमन्त्री श्रीमोदी स्टैचू आफा यूनिटी इत्यत्र पुष्पाञ्जलिम अपि समर्पयिष्यति। श्रीमोदी एकतानगरे चतुशतकोटिरूप्यकाणां विविधविकासपरियोजनानां शिलान्यासं, उद्घाटनं, लोकार्पणं च करिष्यति।

सर्वोच्चन्यायालयस्य महत्त्वपूर्णः निर्णयः उचित सतर्कतायाः अभावे सति डिजिटल वञ्चना-बाधितेभ्यः अधिकोषैः करणीया क्षतिपूर्तिः



सर्वोच्चन्यायालयेन उक्तम् अस्ति यत् डिजिटल कपटेन पीडितानां हानिं प्रति वित्तकोषाः अन्याः च वित्तीयसंस्थाः उत्तरदायिन्यः भवेयुः । न्यायालयः अवदत् यत् यदि वित्तीयसंस्थायाः विफलतायाः परिणामेन कपटम् अभवत् इति ज्ञायते तर्हि डिजिटल अरेस्ट्-स्कैम इत्यादिभिः अपराधैः पीडितेभ्यः न्यूनातिन्यूनं क्षतिपूर्तिं प्रदातव्यम्। मुख्यन्यायाधीशः सूर्यकान्तः, न्यायमूर्तिः जोयमाल्या बाग्ची, न्यायमूर्तिः वि. मोहना इत्येतेषां पीठेन उक्तं यत्, भारतीय-रिजर्व-बैंक इत्यस्य प्रस्तावितस्य नो योर कस्टमर (के.वाय.सी.) संशोधननिर्देशस्य, विंशति षड्विंशति इत्यस्य परीक्षणं करिष्यति। निर्देशाः नवम्बर-मासस्य त्रिंशत् दिनाङ्कात् पूर्वं प्रसारिताः भविष्यन्ति, दिसम्बर-मासस्य एकत्रिंशत् दिनाङ्कात् पूर्वं कार्यान्विताः च भविष्यन्ति ।

करकचतुर्थी-पर्वः- शिमलायाः 'रिज'-प्राङ्गणे चन्द्रदर्शनाय समागताः सौभाग्यवत्यः, पत्युः हस्ताभ्यां जलं पीत्वा समापितं व्रतम्



हिमसंस्कृतवार्ताः- शिमला। करवाचौथपर्वणः अवसरे गुरुवासरे हिमाचलप्रदेशस्य विपणिषु (आपणेषु) आदिवसं महती शोभा अवर्तत। प्रभातात् एव क्रयणाय महिलानां सम्मर्दः प्रारब्धः, यश्च क्रमः चिर- सायङ्कालं यावत् प्राचलत्। अपरत्र सायङ्काले चन्द्रे समुदिते सति सौभाग्यवतीभिः करवाचौथ-व्रतं समाप्य पारणा कृता। राजधान्याः शिमलायाः ऐतिहासिके रिज-प्राङ्गणे सौभाग्यवत्यः नार्यः चन्द्रदर्शनाय अलङ्कृताः सत्यः सम्प्राप्ताः। रात्रौ चन्द्रे दृष्टे सति शतशः महिलाः युगपदेव स्वपत्युः हस्ताभ्यां जलं पीत्वा स्वव्रतं समापयन्। रिजप्राङ्गणे सायं ७:३० वादनात् एव विवाहितानि युगुलानि समवेतुं प्रारभन्त। अस्मिन् अन्तराले आरक्षिणः (पुलिस- कर्मचारिणः) अपि सुरक्षादृष्ट्या सञ्चरन्तः दृष्टाः। आदिनं ऋतोः प्रतिकूलतया (खराब मौसम) चन्द्रदर्शनं न स्याद् इति भयम् अपि जातम्। मेघानां मध्ये चन्द्रदर्शनं भविष्यति न वा, इति मत्वा महिलाः व्यग्रतया प्रतीक्षां कुर्वत्यः आसन्।

प्रतिकूल-ऋतुना वर्धिता चन्द्रदर्शनस्य प्रतीक्षा

रात्रौ प्रायः ८:०५ वादने मेघानां मध्यात् यथैव केलस्टन-क्षेत्रस्य दिशातः चन्द्रः समुदितः, तथैव नार्यः चालनीं (छलनी) स्थालिकायां च जलपूर्णं कलशम् आदाय व्रतसमापनाय स्थाने स्थाने समुपस्थिताः अभवन्। किन्तु मेघानां कारणेन चन्द्रः स्पष्टतया न दृष्टः, येन कारणात् महिलाभिः बहुकालं यावत् प्रतीक्षा करणीया जाता। स्थानीयजनैः सह पर्यटक-युगुलैः अपि रिज-प्राङ्गणे चालन्या चन्द्रमसं दृष्ट्वा करवाचौथ-पूजा विहिता। अस्मिन् समये बहवः वृद्धाः दम्पतयः अपि करवाचौथ- व्रतस्य पारणाय रिज-प्राङ्गणे सम्प्राप्ताः आसन्। पञ्जाबराज्यतः समागतं नवविवाहितं युगुलं सिमरनकौर, रोहनसिंहश्च अवदताम् यत् ताभ्याम् एकमासात् पूर्वमेव करवाचौथ-पर्वणे शिमलायाम् आगमनाय योजना कृता आसीत्। अत्र शतशः महिलाः युगपदेव व्रतं समापयन्ति, एतत् दृश्यम् अतीव अद्भुतं वर्तते।



अंशविपणिसमाचारः

भारतीयांशविपण्यां महती वृद्धिः

हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, मुम्बई, २९ अक्टूबर २०२६। गुरुवासरे भारतीयांशविपण्याम् उत्साहवर्धिनी वृद्धिः अभवत्। विगतदिवसस्य अवनतेः अनन्तरं निवेशकानां क्रयविक्रयव्यवहारे क्रयप्रवृत्तेः आधिक्येन प्रमुखसूचकाङ्कयोः उल्लेखनीया वृद्धिः अभिलक्षिता। मुम्बईशेयरविपण्यां त्रिंशत्-शेयरात्मकः सेन्सेक्ससूचकाङ्कः ९०५.०१ अङ्कैः (१.२४ प्रतिशतं) वर्धित्वा ७४,१५१.०४ अङ्केषु समापितः। राष्ट्रिय-शेयरविपण्यस्य निफ्टी-पञ्चाशत्- सूचकाङ्कः २३७.९० अङ्कैः (१.०५ प्रतिशतं) वर्धित्वा २२,९३६.७५ अङ्कानां स्तरं प्राप्तवान्। अमेरिकादेशस्य केन्द्रीयवित्त-कोषस्य ऋणस्य व्याजमानेषु स्थैर्यरक्षणस्य निर्णयः, अपरिष्कृततैलस्य मूल्यानां किञ्चित् न्यूनता, संस्थागतनिवेशकानां क्रयप्रवृत्तिः च विपण्याः वृद्धौ सहायकाः अभवन्। वित्तीयसेवा-विद्युत्- प्रौद्योगिकी- स्थावरसम्पदा-उपभोक्तृवस्तुक्षेत्रेषु च क्रयणोत्साहः दृष्टः।अदानी-पोर्ट्स, अदानी-एण्टरप्राइजेज, पावरग्रिड् तथा कोटक-महिन्द्रा-वित्तकोष इत्यादीनां कतिपय प्रमुखसंयन्त्राणां समभागेषु वृद्धिः अभवत्। अपि च ट्रेण्ट तथा मारुति-सुजुकी इत्यादीनां कतिपयसंयन्त्राणां समभागेषु अवनतिः अपि दृष्टा। अतः सर्वेषु क्षेत्रेषु समानरूपेण वृद्धिः नाभवत्। विश्लेषकाणां मते, आगामिदिने विपण्याः दिशि वैश्विकार्थिकपरिस्थितीनां, अपरिष्कृत तैलस्य मूल्यानां, रुप्यकस्य विनिमयमूल्यस्य, निगमसम्पादितलाभानां, निवेशकानां क्रयविक्रयप्रवृत्तीनां प्रभावः भविष्यति। अतः निवेशकाः विपण्याः उन्नतावनत्योः सम्यक् अवगत्य सावधानतया निवेशसम्बद्धान् निर्णयान् कुर्युः।

सिद्धार्थनगरे परालीदाह-कर्तृभ्यः भविष्यति दण्डः जिलाधिकारी शिवशरणप्पा जी. एन. इत्यनेन

जनजागरूकताप्रचारवाहनं हरितध्वजं प्रदर्श्य प्रेषितम्

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। उत्तरप्रदेशस्य सिद्धार्थनगरजनपदे परालीदाहस्य घटनाः निवारयितुं जनपदप्रशासनेन जनजागरूकताभियानम् आरब्धम्। बुधवासरे जिलाधिकारी शिवशरणप्पा जी. एन. जनजागरूकता- प्रचारवाहनं हरितध्वजं प्रदर्श्य प्रेषितवान्। एतत् प्रचारवाहनं जनपदस्य विभिन्नग्रामपञ्चायतीः प्राप्य कृषकान् फसलावशेषदाहस्य दुष्परिणामान् तेषां समुचितप्रबन्धनस्य उपायांश्च प्रति जागरूकान् करिष्यति।

परालीदाहेन पर्यावरणस्य मृदायाश्च हानिः

क्षेत्रेषु परालीदाहेन पर्यावरणं प्रदूषितं भवति। अस्य मानवस्वास्थ्यस्य भूमेः उर्वराशक्तेश्चोपरि प्रतिकूलः प्रभावः जायते। परालीदाहेन भूमौ विद्यमानाः लाभदायकाः सूक्ष्मजीवाः अपि नष्टाः भवन्ति। अपि च, समीपस्थेषु अन्येषु सस्यक्षेत्रेषु सम्पत्तिषु च अग्निप्रसरणस्य संकटं वर्धते।

कृषकाः फसलावशेषान् न दहेयुः

जिलाप्रशासनं कृषकान् आह्वयति यत् ते फसलावशेषान् क्षेत्रेषु न दहेयुः, अपितु कृषियन्त्राणां साहाय्येन मृत्तिकायां मिश्रयेयुः। पराली मल्चिङ्ग-प्रक्रियायां, पशुचारे, कम्पोस्टनिर्माणे, जैविकखादनिर्माणे च उपयोक्तुं शक्यते। एतेन पर्यावरणस्य संरक्षणं भवति तथा च मृदायाः उर्वराशक्तिः अपि वर्धते।

परालीदाहे दण्डस्य प्रावधानम्

प्रशासनेन कृषकान् परालीदाहसम्बद्ध-दण्डविधानस्य विषये अपि जागरूकान् कर्तुं व्यवस्था क्रियते। निर्धारितनियमानुसारं-द्वि-एकड-क्षेत्रात् न्यूनभूमौ परालीदाहे पञ्चसहस्ररूप्यकाणां दण्डः।

- द्वि-एकड-तः पञ्च-एकड-पर्यन्तं भूमौ परालीदाहे दशसहस्ररूप्यकाणां दण्डः।
- पञ्च-एकडतः अधिकभूमौ परालीदाहे त्रिंशत्सहस्ररूप्यकाणि यावत् पर्यावरण-क्षतिपूर्तिरूपेण दण्डः आरोपयितुं शक्यते।

परालीदाहस्य पुनरावृत्तौ पुनः दण्डारोपणस्य तथा विभागीययोजनानां लाभेभ्यः वञ्चनस्य अपि प्रावधानम् अस्ति इति प्रशासनपक्षतः सूचितम्।

कृषकजागरूकतायै विशेषाभियानम्

कृषकान् परालीदाहस्य दुष्परिणामेभ्यः अवगतं कर्तुं जिलाधिकारी शिवशरणप्पा जी.एन. अनेन प्रचारवाहनेन जागरूकताभियानस्य शुभारम्भं कृतवान्। अस्मिन् अवसरे उपकृषिनिदेशकः राजेशकुमारः अपि उपस्थितः आसीत्।

प्रशासनस्य मुख्योद्देश्यं परालीदाहस्य घटनानां न्यूनीकरणं, पर्यावरणसंरक्षणं, कृषिभूमेः उर्वराशक्तेः रक्षणं, कृषकाणां च मध्ये पर्यावरणानुकूल- कृषिपद्धतीनां प्रचारः च अस्ति।

जातिसूचकदुरुक्तिं विना अनुसूचितजाति- जनजाति अत्याचारनिवारणाधिनियमान्तर्गतं प्रकरणं न प्रवर्तते

पीडितस्य अनुसूचितजाति-जनजाति- सदस्यत्वमात्रेण अधिनियमस्य प्रयोगः न पर्याप्तः; प्रयागराजोच्चन्यायालयेन आरोपपत्रं निरस्तम्।

हिमसंस्कृतवार्ताः- प्रयागराजः, २९ अक्टूबर २०२६। राजकिरण चौधरी अधिवक्ताः प्रयागराजस्थितेन इलाहाबादोच्चन्यायालयेन स्पष्टं प्रतिपादितं यत् अनुसूचितजाति-अनुसूचितजनजाति अत्याचार- निवारणाधिनियमस्य (SC/ST Act) अन्तर्गतं प्रकरणं पञ्जीकर्तुं केवलं परिवादकर्तुः अनुसूचितजाति- जनजातिसदस्यत्वं पर्याप्तं न भवति। यावत् जात्याधारितम् अपमानजनकं वचनं, जातिसूचकदुरुक्तिः अथवा अपमानयितुं कृतः सुस्पष्टः प्रयासः प्रमाणैः न सिद्ध्यति, तावत् अस्य अधिनियमस्य अन्तर्गतं कार्यवाही कर्तुं न शक्यते। न्यायालयेन इदमपि स्पष्टं कृतं यत् जातिसूचकापमानस्य आरोपः प्रमाणैः समर्थितः भवेत् तथा विधिना निर्धारिताः आवश्यकाः परिस्थितयः अपि विद्यमानाः भवेयुः।

सिद्धार्थनगरजनपदस्य प्रकरणे आरोपपत्रं निरस्तम्

प्राप्तविवरणानुसारं सिद्धार्थनगरजनपदस्य इटवा-थानान्तर्गत अमरनाथचौधरीसम्बद्धे अनुसूचितजाति- अनुसूचितजनजाति-अत्याचारनिवारणाधिनियमस्य (SC/ST) प्रकरणे अधिवक्ता राजकिरणचौधरी। एकस्मिन् प्रकरणे विशेषन्यायाधीशस्य आदेशं चुनौतीकृत्य उच्चन्यायालये याचिका प्रस्तुतासीत्। याचिकाकर्तुः पक्षे कथितं यत् तस्य विरुद्धं मिथ्या जातिप्रमाणपत्रस्य निर्माणस्य आरोपः कृतः आसीत् तथा परिवादकर्त्रा मारपीटस्य आरोपः अपि आरोपितः आसीत्।प्रकरणस्य परीक्षणं कुर्वन् उच्चन्यायालयेन अवलोकितं यत् प्रथमसूचनाप्रतिवेदने जातिसूचकापमानस्य आवश्यकः स्पष्टः उल्लेखः नासीत्। अतः केवलम् अनुसूचितजाति-जनजाति अत्याचारनिवारणाधिनियमस्य आधारेण कार्यवाही करणीयम् इति नास्ति। न्यायमूर्तिना संतोष राय प्रकरणस्य विधिकपक्षाणां परीक्षणानन्तरम् अधीनस्थन्यायालयस्य निर्णयः निरस्तः कृतः।

अधीनस्थन्यायालयस्य निर्णयस्य पुनरीक्षणम्

न्यायालयेन प्रतिपादितं यत् अधीनस्थन्यायालयस्य निर्णयः विधिसम्मतः भवितुमर्हति। परन्तु यदि प्रकरणे आवश्यकानां विधिकतत्त्वानां अभावः अस्ति, तर्हि केवलम् आरोपस्य आधारेण अभियोजनकार्यवाही प्रवर्तयितुं न शक्यते। अतः जात्याधारितापमानस्य आरोपः प्रमाणैः समर्थितः भवेत्। अन्यथा अनुसूचितजाति-जनजाति अत्याचारनिवारणाधिनियमस्य प्रयोगः विधिसम्मतः न भविष्यति।

न्यायालयस्य प्रमुखः सन्देशः-

अनुसूचितजाति-जनजातिसदस्यस्य अपमानस्य विषयः गम्भीरः अस्ति; तथापि अधिनियमस्य अन्तर्गतं कार्यवाही कर्तुं विधिना निर्धारितानि आवश्यकतत्त्वानि प्रमाणैः सिद्धानि भवेयुः।

सिद्धार्थनगरे, बांसी-डुमरियागञ्जे च नलिकामार्गेण गैसापूर्तेः योजना

जिलाधिकारी शिवशरणप्पा जी. एन. इत्यनेन अधिकारिभ्यः निर्धारितसमये कार्यसमाप्तेः निर्देशः





हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। उत्तरप्रदेशस्य सिद्धार्थनगरजनपदवासिनां कृते शुभसमाचारः अस्ति। जनपदस्य सिद्धार्थनगरम्, बांसी तथा डुमरियागञ्जम् इत्येतेषु त्रिषु नगरीयक्षेत्रेषु नलिकामार्गेण (पाइपलाइनद्वारा) गैसापूर्तेः योजना कार्यान्वयितुं प्रशासनपक्षतः प्रयासाः तीव्राः कृताः सन्ति। अस्मिन् विषये बुधवासरे जिलाधिकारी शिवशरणप्पा जी.एन. महोदयस्य अध्यक्षतायां कलेक्ट्रेटसभागारे नगरगैसजालसम्बद्धसमितेः बैठकम् आयोजिता। तत्र सम्बन्धिताधिकारिभ्यः अवशिष्टकार्याणि निर्धारितसमयसीमायामेव सम्पादयितुं निर्देशाः प्रदत्ताः। उपवेशनस्यावसरे जिलापूर्त्यधिकारी देवेन्द्रप्रतापसिंहः जिलाधिकारिणे अवदत् यत् जनपदे नलिकामार्गेण गैसापूर्तेः कृते सिद्धार्थनगरम्, बांसी तथा डुमरियागञ्जम् इति त्रीणि नगरीयक्षेत्राणि चयनितानि सन्ति। प्रस्तावित गैसनलिका गोरखपुरतः महाराजगञ्जजनपदस्य फरेंदा-मार्गेण सिद्धार्थनगरं प्राप्स्यति।जिलाधिकारी शिवशरणप्पा जी. एन. सम्बन्धिताधिकारिभ्यः स्पष्टनिर्देशान् दत्तवान् यत् नगरगैसजालपरियोजनायाः सम्बन्धीनि यानि कार्याणि अद्यापि अवशिष्टानि सन्ति, तानि निर्धारितसमयसीमायाः अन्तर्गतं सम्पादनीयानि। योजनायाः कार्यान्वयने ये समस्याः उत्पद्यन्ते, तासां समाधानं सम्बन्धिताधिकारिभिः परस्परसमन्वयेन सुनिश्चितं करणीयम्। अस्मिन् उपवेशने अपरजिलाधिकारी (वित्त एवं राजस्व) सन्दीप श्रीवास्तवः, जिलापूर्त्यधिकारी देवेन्द्रप्रतापसिंहः, नगरपालिकानां, नगरपञ्चायतानां कार्यपालकाधिकारिणश्च उपस्थिताः आसन्।अधुना प्रतीक्षा अस्ति यत् नगरगैसजालस्य एषा महत्त्वपूर्णा योजना कदा धरातले कार्यान्विता भविष्यति तथा च जनपदवासिभ्यः नलिकामार्गेण गैसापूर्तेः सुविधा कदा उपलब्धा भविष्यति



रविः खरिडेहालः - बेङ्गलूरु।

"क्रीडासामग्रीनिर्माणं हरितसंकेतं प्राप्नोति"

२०२६-२७ तमस्य वर्षस्य आयव्ययके क्रीडोपस्कराणां निर्माणाय नियोजनं घोषितम् आसीत् । इत्युक्ते खेलो-इण्डिया-क्रीडासामग्रीनिर्माणयोजनायाः कृते १८५६.६७ कोटिरूप्यकाणां राशिः अनुमोदिता अस्ति । इयं अनुमोदनं २०२६ तः २०३३-३४ पर्यन्तं कालखण्डस्य कृते अस्ति । योजना वैश्विकरूपेण प्रतिस्पर्धात्मकस्य उद्योगस्य निर्माणार्थं अनुसन्धानं नवीनतां च, कौशलविकासं, गुणवत्ताप्रमाणीकरणं, विपण्यविकासं च केन्द्रीक्रियते। वैश्विक-आपूर्ति-शृङ्खलासु भारतस्य भूमिकां सुदृढां करोति । योजना नूतनान् कार्यस्य अवसरान् सृजति तथा च - "भारतं स्पर्धां करोति, भारतं निर्माणं करोति" इत्यस्य माध्यमेन निवेशं आकर्षयिष्यति। एतेन देशस्य गौरवः वर्धते, आत्मनिर्भरतायाः, विकसितभारतस्य च प्रयत्नानाम् समर्थनं भविष्यति। मुख्यविशेषता क्रीडासामग्रीनिर्माणक्षेत्राणि, समूहाधारितनिर्माणं च अस्ति ।

चमियाणा-चिकित्सालयाय सुक्खू-सर्वकारस्य महदोपहारः, चिकित्सकैः सह अनेकेषां पदानां कृते प्रदत्ता स्वीकृतिः

हिमसंस्कृतवार्ता — शिमला।

प्रदेशसर्वकारस्य प्रवक्त्रा विज्ञापितं यत् राज्ये स्वास्थ्यसंस्थानां सुदृढीकरणस्य प्रयासानाम् अन्तर्गततया सर्वकारेण शिमलायाः 'अटल-इन्स्टिट्यूट्-आफ्-मेडिकल-सुपर-स्पेशियलिटीज्' (AIMSS), चमियाणा इत्यस्मै विविधानां पदानां सृजनाय स्वीकृतिः प्रदत्ता। तेन विज्ञापितं यत् चमियाणायां विविधविभागानां स्थापनायाः, सुदृढीकरणस्य, युक्तिकरणस्य (तर्कसङ्गतिकरणस्य) च निर्णयस्य उद्देश्यं चिकित्सालयेषु पर्याप्तायां संख्यायां वैद्यानां (चिकित्सकानां) तथा च पैरामेडिकल-कर्मचारिणां समुपलब्धतां कारयितुं राज्यसर्वकारस्य लक्ष्यं पूरयितुं वर्तते। अस्मिन् निर्णये सुपर-स्पेशियलिटी-स्वास्थ्यसेवाः, चिकित्साशिक्षाम्, अध्यापनं, 'क्लीनिकल'-सुविधाश्च सुदृढीकर्तुं नूतनपदानां सृजनेन सहैव आईजीएमसी-शिमला तथा एआईएमएसएस-चमियाणा इत्येतयोः अन्यविभागेषु स्वीकृतानां वर्तमानानां पदानां स्थानान्तरणाय तेषां पुनर्वितरणाय च स्वीकृतिः प्रदत्ता अस्ति।

एतेषु 'क्रिटिकल-केयर्-मेडिसिन्'-विभागे प्राध्यापकस्य (प्रोफेसर) एकं पदं, सह-प्राध्यापकस्य (एसोसिएट-प्रोफेसर) एकं पदं, सहायक-प्राध्यापकस्य (असिस्टेंट-प्रोफेसर - सुपर स्पेशियलिटी) एकं पदं, ज्येष्ठ-आवासीय-चिकित्सकस्य (सीनियर-रेजिडेंट) त्रीणि पदानि च समाविष्टानि सन्ति। एतदतिरिच्य, अस्मिन्नेव विभागे सह-प्राध्यापकस्य एकं पदं, सहायक-प्राध्यापकस्य एकं पदं, ज्येष्ठ-आवासीय-चिकित्सकस्य द्वे पदे अपि स्वीकृते। 'एनेस्थीसिया' (संज्ञाहरण)-विभागे प्राध्यापकस्य एकं पदं, सह-प्राध्यापकस्य एकं पदं, सहायक-प्राध्यापकस्य त्रीणि पदानि, ज्येष्ठ-आवासीय-चिकित्सकस्य पञ्च पदानि च स्वीकृतानि।

'सर्जिकल-गैस्ट्रोएंट्रोलॉजी' (जीआई सर्जरी)-विभागे सह-प्राध्यापकस्य एकं पदं, सहायक-प्राध्यापकस्य (सुपर स्पेशियलिटी) एकं पदं, ज्येष्ठ-आवासीय-चिकित्सकस्य चत्वारि पदानि स्वीकृतानि सन्ति। तथैव, 'रेडियो-डायग्नोसिस/रेडियोलॉजी'-विभागे प्राध्यापकस्य एकं पदं, सह-प्राध्यापकस्य एकं पदं, सहायक-प्राध्यापकस्य द्वे पदे, ज्येष्ठ-आवासीय-चिकित्सकस्य अष्ट पदानि च स्वीकृतानि। अन्येषु स्वीकृतेषु पदेषु आहारविशेषज्ञस्य (डाइटीशियन) एकं पदं, 'सीएसएसडी'-पर्यवेक्षकस्य (सुपरवाइजर) द्वे पदे, मुख्य-भेषजज्ञस्य (चीफ-फार्मासिस्ट) एकं पदं च समाविष्टम् अस्ति।

प्रवक्त्रा विज्ञापितं यत् सर्वकारेण सुरक्षाकर्मचारिणां ५० पदानि, स्वच्छताकर्मचारिणां ५० पदानि, 'वार्ड-अटेंडेंट'-इत्येतेषां ५० पदानि, 'पैथोलॉजी', 'बायोकेमिस्ट्री', 'माइक्रोबायोलॉजी', 'ब्लड-बैंक'-इत्येतेषां कृते प्रयोगशाला-तन्त्रज्ञानां (लैब-टेक्नीशियन) ५-५ पदानि पूरयितुं स्वीकृतिः प्रदत्ता अस्ति। एतदतिरिच्य, आरोग्यमित्रस्य ४ पदानि, भौतिक-चिकित्सकस्य (फिजियोथेरेपिस्ट) २ पदे, चालकस्य ३ पदानि, जेओए-आईटी (JOA-IT)-पदस्य च एकं पदं पूरयितुम् अपि स्वीकृतिः विहिता। सः अवदत् यत् प्रदेशसर्वकारेण द्वयोः बस-यानयोः भाटकेन ग्रहणाय अपि स्वीकृतिः प्रदत्ता वर्तते।



"अकबर- बीरबलकथा"

एकस्मिन् दिने सम्राट अकबरः स्वराज्ञ्या सह आलिन्दे उपविष्टः आसीत्। तस्मिन् समये राज्ञी उक्तवती, त्वं मम भ्रातरं प्रमुखसचिवं कृत्वा बीरबलं राज्यात् बहिः प्रेषयतु। अकबरः स्वपत्न्याः इच्छां पूर्णं कृतवान् किन्तु राज्ञ्याः भ्राता बुद्धिमान् नासीत्। तस्मिन् समये केनचित् दूरतः वृषभशकटस्य शब्दः श्रूयते स्म। अकबरः स्वश्यालकम् अवदत्- गत्वा पश्यतु एतानि कस्य वृषभशकटाः सन्ति, कुत्र गच्छन्ति इति। श्यालः तत्क्षणमेव गत्वा पुनः आगत्य महाराजं न्यवेदत् यत् वृषभशकटाः कस्यचित् व्यापारिणः सन्ति अकबरः पृष्टवान् यत् तस्मिन् शकटे किं सामग्रीम् अस्ति? राज्ञ्याः भ्राता पुनः गत्वा पुनः आगत्य अवदत्- शकटे काश्मीरी कालीनाः सन्ति। अकबरः तृतीयं प्रश्नं पृष्टवान् यत् ते सर्वे वृषभशकटाः कुत्र गच्छन्ति? श्यालकः भ्रान्तः भूत्वा उक्तवान् अहं पृष्ट्वा आगमिष्यामि इति। श्यालकः गमनात् पूर्वं बीरबलः तत्र आगतः, अकबरेण बीरबलम् अपि एतदेव प्रश्नं पृष्टवान्। बीरबलः बहिः गत्वा किञ्चित्कालानन्तरं पुनः आगत्य अवदत्- महाराज पञ्चाशत् वृषभशकटाः सन्ति सर्वे शकटाः कश्मीरस्य प्रसिद्धव्यापारिणः रामदासमहोदयस्य अस्ति तथा शकटे मौल्यवान कालीनाः, पश्मिनाराङ्कवा/ और्णप्रावारकाः च सन्ति। सः एतानि वस्तूनि प्रतिवेशि राज्यं प्रति नयति। अद्य रात्रौ अस्माकं राज्ये स्थातुम् अहं तं प्रार्थितवान्। एतानि सर्वाणि वस्तूनि च अस्माकं मुख्यविपण्ये प्रदर्शयितुं अहम् अनुरोधं कृतवान्। तत्सर्वं दृष्ट्वा श्रुत्वा च राज्ञी, तस्याः भ्राता तूष्णीं अतिष्ठताम्। उभौ मौनम् अभवताम्। यस्य कार्यम् अस्ति सः एव तत् कर्तुं शक्नोति।

हिमाचलस्य 'बल्क-ड्रग्-पार्क'-विषये प्रधानमन्त्रिणः नरेन्द्रमोदिनः वक्तव्यम्

हिमसंस्कृतवार्ता — नवदेहली।

प्रधानमन्त्रिणा नरेन्द्रमोदिना 'प्रगति' इत्याख्यायाः समीक्षा-संस्थायाः चतुःपञ्चाशत्तमे (५४) उपवेशने हिमाचलप्रदेशे, गुजराते, आन्ध्रप्रदेशे च विकस्यमानानां 'प्रचुर-औषध-उद्यान-परियोजनानां (बल्क-ड्रग्-पार्क') समीक्षा कृता। उपवेशने देशे औषधनिर्माणाय आवश्यक-अपक्व-घटकानां तथा च 'सक्रिय-भेषज-घटकानाम्' (Active Pharmaceutical Ingredients - API) आन्तरिक-उत्पादनं संवर्धयितुं बलं दत्तम्। अस्य उद्देश्यम् औषधोद्योगे भारतस्य स्वावलम्बनं प्रवर्धयितुम् आयातस्य चोपरि निर्भरतां न्यूनीकर्तुं वर्तते। हिमाचलप्रदेशस्य ऊना-मण्डलस्थे हरोली-क्षेत्रे विकस्यमानं बल्क-ड्रग्-पार्क-प्रकल्पम् अधिकृत्य प्रधानमन्त्रिणा नरेन्द्रमोदिना सह सम्पन्नम् उपवेशनं सकारात्मकम् आसीत्। उपवेशनकाले प्रधानमन्त्री परियोजनायाः क्रियान्वयने तीव्रताम् आनेतुं श्रेष्ठप्रदर्शनं विधातुं च बलं दत्तवान्। सः सम्बद्धपक्षेभ्यः अधिकसक्रियतया कार्यं कर्तुं परियोजनां च प्रभाविरूपेण अग्रे नेतुं सन्देशं प्रादात्। सहैव भारतसर्वकारः दिसम्बर-मासे पुनः अस्य प्रकल्पस्य समीक्षां विधास्यति।

बल्क-ड्रग्-पार्क-विषये सम्पन्नम् इदम् उपवेशनम् अत एव महत्त्वपूर्णं वर्तते, यतो हि केन्द्रसर्वकारः देशे औषधनिर्माणार्थम् आवश्यकस्य अपक्व-सामग्र्याः एपीआई (API)-घटकानां च आन्तरिक-उत्पादनस्य संवर्धनाय बलं ददाति। हिमाचलप्रदेशस्य हरोली-क्षेत्रे विकस्यमानम् इदम् उद्यानम् (पार्क) राज्ये औद्योगिकनिवेशं प्रवर्धयितुम् औषधोद्योगं च सुदृढं विधातुं सामर्थ्यं धारयति। प्रायः १९२३ कोटिरूप्यकाणाम् अनुमानितव्ययायुक्तायै अस्यै परियोजनायै केन्द्रसर्वकारेण १००० कोटिरूप्यकाणां साहाय्यं स्वीकृतम् अस्ति। अस्मिन् उद्याने मार्ग-विद्युत्- जल-अपशिष्ट-उपचार-सदृशाः साझीभूताः औद्योगिकसुविधाः विकस्यन्ते। परियोजनायाः पूर्णविकासेन औषधनिर्माणसंस्थाभ्यः उत्पादनैकानां संस्थापने साहाय्यं लप्स्यते, राज्ये च वृत्ति-संयोगस्य (रोजगारस्य) नूतनावसराः उत्पत्स्यन्ते इत्याशा वर्तते। कर्मसु तीव्रताम् आनेतुं श्रेष्ठप्रदर्शनं कर्तुं च प्रधानमन्त्रिणः सन्देशः परियोजनासम्बद्धानाम् अधिकारिणां कृते महत्त्वपूर्णः मन्यते। देहलीतः सम्पन्नायाम् अस्यां दृश्य-श्राव्य-गोष्ठ्यां मुख्यसचिवेन के.के. पन्तेन राज्यस्य पक्षः उपस्थापितः। प्रधानमन्त्रिणा कोविड-काले स्वीकृतायाः अस्याः परियोजनायाः देशहितदृष्ट्या महत्त्वं प्रतिपाद्य निर्धारित-समयसीमायां (डेडलाइन-मध्ये) कार्यं पूर्णं कर्तुम् उक्तम्।

सहस्रशः वृत्ति-संयोगावसराणां (रोजगारस्य) समुत्पत्तेः सम्भावना

हरोली-बल्क-ड्रग्-पार्क-प्रकल्पः हिमाचलप्रदेशस्य औद्योगिकविकासस्य दृष्ट्या महत्त्वपूर्णः मन्यते। अस्याः परियोजनायाः औषधनिर्माणक्षेत्रे निवेशस्य वृद्ध्या सहैव स्थानीयतरुणानां कृते वृत्ति-संयोगावसराः (रोजगारस्य अवसराः) समुत्पत्स्यन्ते इति सम्भावना वर्तते। एतदतिरिच्य परिवहन-, संवेष्टन-, अनुरक्षण-अन्याभिः सहाय्यकसेवाभिः सम्बद्धेभ्यः व्यापारेभ्यः अपि लाभः प्राप्तुं शक्यते। अनेन ८,००० तः १०,००० कोटिरूप्यकाणां यावत् निवेशः आकर्षयिष्यते, १५,००० तः २०,००० यावत् जनेभ्यः प्रत्यक्षवृत्ति-संयोगावसराः समुपलब्धाः भविष्यन्ति इति सम्भाव्यते।



©वत्सदेशराजशर्मा, हिमसंस्कृतवार्ता

ज्योतिषरत्नोपाधिसम्मानितस्य डॉ. अभिषेकशर्मणः प्रशस्तिः

हिमाचलप्रदेशान्तर्गत- मण्डीमण्डल-मण्डनायमानस्य ज्योतिर्विद्याविशारदस्य डॉ. अभिषेकशर्मणः शास्त्रपारावारपारीणप्रतिभाप्रकर्षः ज्योतिषशास्त्रीय- सिद्धान्तसूक्ष्मावलोकनचातुर्यं ग्रहनक्षत्रगोचरगतिविचारवैदग्ध्यं ऐतिहासिक-घटनाचक्रैः सह खगोलीययोगानां तुलनात्मकानुशीलननैपुण्यं च विदुषां सभासु विशिष्टमादरास्पदमवर्तत। अन्ताराष्ट्रिय-सामरिक- तनावजनित- विश्वयुद्धसम्भावना-विमर्शप्रसङ्गे हरिद्वारस्थे जगद्गुरुशङ्कराचार्याश्रमे शरत्पूर्णिमामहोत्सवस्य पुण्यावसरे समायोजिते विश्वयुद्धस्य सम्भावना ज्योतिषीयं चिन्तनं च इत्याख्यविषयकस्य राष्ट्रियज्योतिषसम्मेलनस्य विद्वत्समागमे स्वकीयगम्भीरशास्त्रचिन्तनप्रौढ्या युक्तियुक्तविचारविन्यासवैशद्येन च समुपस्थितविद्वन्मण्डलस्य विशेषप्रशंसा-भाजनत्वमुपगतवता तेन ग्रहनक्षत्राणां स्थितिगत्योः गोचरजन्ययोगानां प्राचीनैतिहासिक- वृत्तान्तानां समसामयिक-वैश्विक- राजनैतिक- सामरिकपरिस्थितीनां च परस्परसम्बन्धविमर्शे स्वकीयमौलिकानुशीलन-दृष्टिः प्रभाववत्या वाचा समुपस्थापिता। तस्य शास्त्रनिष्ठया विचारगाम्भीर्येण च समाकृष्टैः सम्मेलनायोजकैर्विद्वद्भिश्च तस्मै "ज्योतिषरत्नम्" इत्याख्यः मानदोपाधिः समर्पितः यः न केवलं तस्य वैयक्तिकविद्वत्तायाः सम्मानसूचकः अपि तु हिमाचलप्रदेशस्य शास्त्रीय- ज्योतिषपरम्परायाः गौरवाभिवर्धकश्च वर्तते। तेन सह ज्योतिषाचार्यस्य शीतलशर्मणोऽपि समानोपाधिना सम्माननं सम्पन्नम्। जगद्गुरुशङ्कराचार्यमहाराजस्य पावन-सान्निध्येऽध्यक्षतायां च समनुष्ठितस्यास्य विद्वत्समवायस्य विश्वविख्यातहस्तरेखाविशारदस्य डॉ.लेखराजशर्मणः सान्निध्येन विशेषशोभा समजायत आचार्यरमेशसेमवालमहाराजस्य संयोजकत्वेन च प्राचीनभारतीयज्ञानपरम्परायाः समसामयिकवैश्विकपरिस्थितिभिः सह शास्त्र-सम्मतविमर्शस्य महत्त्वं समुज्ज्वलतामगमत्। अतः डॉ. अभिषेकशर्मणे प्रदत्तमिदं ज्योतिषरत्नसम्मानं तस्य शास्त्रानुरागस्य चिन्तनप्रौढेः विद्वत्समाजे प्रतिष्ठायाश्च अभिनन्दनीयं प्रतीकमस्ति। अस्य महनीयस्य सम्मानस्योपलक्ष्ये तस्मै हार्दिक्यः शुभकामनाः समर्पयामः तस्य शास्त्रसेवापरम्परा निरन्तरं प्रवर्धतां ज्योतिर्विद्याविषयकं तत्त्वानुशीलनं च नवोन्मेषैः समृद्धिं प्राप्नोतु, हिमाचलभूमेश्च विद्वत्परम्परा तदीयया विद्वत्तया सर्वत्र समुज्ज्वलकीर्तिं विस्तारयत्विति सादरमभिनन्दामः।



हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। अद्य मया विचित्राः वार्ताः श्रुताः। राजस्थानराज्ये एका विचित्रा घटना दृष्टा। तत्र एकस्य नरस्य पत्नी पञ्चायत-निर्वाचने पराजिता। तथापि ग्रामीणैः आनन्देन महान् उत्सवः कृतः! "यः पराजितः स एव विजयी" इति तैः ग्रामीणैः चिन्तितम्।

नन्दिनी- अहो! पराजयः अपि उत्सवरूपेण मानितः! एतत् अतीव विचित्रम्। क्यालिफोर्निया-समुद्रे अपि किञ्चित् आश्चर्यं जातम्। तत्र एकेन तन्तुलागेन एकः तरङ्गक्रीडकः पुच्छेन ताडितः। तन्तुलागः तमखादित्वा केवलं तस्य उपरि पुच्छेन प्रहारं कृत्वा शान्त्या गतः!

काव्या- दिष्ट्या सः नरः तन्तुलागेन न खादितः, भाग्येन सः रक्षितः! तदपि अतीव भयानकम्। उत्तरप्रदेशे ह्यः एका अन्या घटना दृष्टा। एका महिला भूमौ उदरबलेन सरन्ती मण्डलाधिकारिणः कार्यालयं गता। तस्याः पत्युः भूमिः तस्याः पतिगृहजनैः अपहृता। अतः सा विरोधार्थम् एतादृशं कष्टं सोढ्वा तत्र गता।

नन्दिनी- एतत् अतीव दुःखदम्। तया महिलया महत् कष्टम् अनुभूतम्। सर्वकारेण सम्यक् विचारणं करणीयम् अत्र। तमिळनाडु-राज्ये अपि पक्षिणां विचित्रा स्थितिः दृष्टा। अष्टादश फ्लेमिङ्गो-पक्षिणः पञ्चाशत्-किलोमीटर-दूरम् एकं स्वादुजलस्य सरोवरं गताः। ते पक्षिणः सर्वदा समुद्रस्य लवणजले एव वसन्ति। परन्तु अनावृष्ट्या ते बाधिताः, अतः ते अपरिचितम् अन्तःस्थलं गताः।

काव्या- सत्यम्! अनावृष्ट्या जलवायुपरिवर्तनेन च पक्षिणः अपि अतीव भ्रान्ताः। सर्वाः अपि अद्यतन्यः वार्ताः अतीव विचित्राः।

अगस्त्यद्वादशकम्

रचयिता- अङ्कुरनागपालः (शोधार्थी, वेदान्तवि., श्रीला.ब.शा.रा.सं.वि.वि.)

शैवशाक्तमहाविष्णुमतोल्लासकरं गुरुम्।
शक्तिसूत्रप्रणेतारं तमगस्त्यमुपास्महे ॥१॥
आदित्यहृदयस्तोत्रवक्तारं शान्तमानसम् ।
ज्योतिर्विद्याविवस्वन्तं तमगस्त्यमुपास्महे ॥२॥
हयशीर्षमनुप्राप्तं सदाचार्यं तपस्विनाम् ।
लोपामुद्राधिपं सिद्धं तमगस्त्यमुपास्महे ॥३॥
शास्त्रशस्त्रास्त्रसारार्थविदामग्र्यमनुत्तमम् ।
दण्डारण्यसद्वाग्यं तमगस्त्यमुपास्महे ॥४॥
वाताप्याद्यसुरप्राणहन्तारं कुम्भजं शिवम् ।
विन्ध्यदर्पविघाताशं तमगस्त्यमुपास्महे ॥५॥
द्रविडाचारवेदादिसदाचारप्रवर्तकम् ।
सप्तर्ष्यन्यतमं वैद्यं तमगस्त्यमुपास्महे ॥६॥
सूचयामास जीवानां गतिर्नाडीविचारणात् ।
त्रिकालज्ञं महात्मानं तमगस्त्यमुपास्महे ॥७॥
सन्मार्गदर्शकं श्रेयोकाङ्क्षिणाममलात्मनाम् ।
जटारुद्राक्षभूषाढ्यं तमगस्त्यमुपास्महे ॥८॥
समुद्रशोषणाद्देवान् रक्षयामास यो मुनिः ।
तपोमूर्तिर्जनाराध्यस्तमगस्त्यमुपास्महे ॥९॥
संलेभे महतीं शैवविद्यां स्कन्दसमाश्रयात् ।
युद्धविद्याविदं देवं तमगस्त्यमुपास्महे ॥१०॥
भगवन्तं महावीर्यं महद्ध्यानपरायणम् ।
राघवार्चितपादाब्जं तमगस्त्यमुपास्महे ॥११॥



कावेरीं प्रददौ पुण्यां लोकेभ्यः कृपया प्रभुः ।
महादेवमहच्छिष्यं तमगस्त्यमुपास्महे ॥१२॥
अगस्तेश्च प्रशस्तिर्नो महद्ध्यानफलात्मिका ।
श्रेयस्कामात्समुद्गीता नागपालाङ्कुरेण हि ॥
(रचना : २९.१०.२०२६, अनुष्टुभि)

आयुष्मान-वय-वन्दना-योजनायाः द्वे वर्षे पूर्णे

आयुष्मान-वय-वन्दना-योजनायाः द्वे वर्षे पूर्णे अभवताम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना २०२४ तमस्य वर्षस्य अक्टूबर-मासे अस्याः योजनायाः शुभारम्भः कृतः आसीत्। अस्याः योजनायाः अन्तर्गतं सप्तत्यधिकवयस्कानां (७० वर्षतः वा तदधिकवयस्कानां) सर्वेषां वृद्धानां, तेषाम् आर्थिकस्थितेः चिन्तां विना, आयुष्मान् भारत-प्रधानमन्त्री जन-आरोग्य-योजनायाः माध्यमेन निःशुल्क-उपचारस्य सुविधा प्रदीयते।स्वास्थ्य-परिवार-कल्याण-मन्त्रालयेन उक्तं यत् अस्याः योजनायाः उद्देश्यं प्रायः षट्-कोटिमितानां (६ कोटि) योग्यानां वृद्धानां कृते सम्मानजनकस्य निःशुल्कस्य च उपचारस्य सुविधायाः उपलब्धिं कारयितुम् अस्ति। अत्र प्रत्येकं योग्य-परिवारः प्रतिवर्षं पञ्चलक्ष-रूप्यकाणां स्वास्थ्य-बीमा-कवरं प्राप्नोति।

दीपावलीमासमहोत्सव-२०२६ उपलक्ष्ये एकदिवसीय-विशिष्टव्याख्यानस्य सफलम् आयोजनं सुसम्पन्नम्



कटनी, मध्यप्रदेशः।महर्षिमहेशयोगीवैदिक-विश्वविद्यालयः, मध्यप्रदेशस्य तथा संस्कृतसंस्कृतिविकाससंस्थानस्य, मध्यप्रदेश-प्रान्तस्य च संयुक्तत्त्वावधाने दीपावलीमासमहोत्सव-२०२६ इत्यस्य शुभावसरे दिनाङ्के २८ अक्टोबर्, २०२६ (बुधवासरे) सायं ७:३० वादनतः ८:३० वादनपर्यन्तम् अन्तर्जालमाध्यमेन (गूगलमीट् द्वारा) एकदिवसीयविशिष्टव्याख्यानस्य सफलम् आयोजनम् अभवत्।

अस्य विशिष्टव्याख्यानस्य मुख्यविषयः आसीत् - “दीपोत्सवः : वैदिकज्ञानम्, आध्यात्मिकचेतना भारतीयसंस्कृतेश्च महापर्व” इति। अस्य कार्यक्रमस्य मुख्योद्देश्यं दीपावलीपर्वणः वैदिकम् आध्यात्मिकं च महत्त्वं प्रकाशयितुम्, भारतीयसांस्कृतिकपरम्पराणां, ज्ञानस्य, चेतनायाः, सद्भावस्य सकारात्मकतायाश्च महत्त्वं जनसामान्यं प्रति च प्रसारयितुम् आसीत्।

कार्यक्रमस्य शुभारम्भः श्रीमता ऋग्वेदपण्डितेन पुनीततिवारीमहोदयेन वैदिकमङ्गलाचरणेन अभवत्। ततः श्रीमता भूपेशतिवारीमहोदयेन संस्कृत संस्कृतिविकाससंस्थानस्य कुलगीतं प्रस्तुतम्। अनन्तरं डॉ. विश्वामित्ररायमहोदयेन स्वागतभाषणं प्रस्तुतम्। अस्मिन् कार्यक्रमे मुख्यवक्तृरूपेण श्रीरामविनोदसिंहगौरमहोदयः (राष्ट्रियसंयोजकः, भावातीतध्यानं-सिद्धिकार्यक्रमः, महर्षिविद्यामन्दिरम्, भारतम्, उपस्थितः आसीत्। स्वकीयसम्बोधने तेन दीपोत्सवस्य वैदिकस्य, आध्यात्मिकस्य सांस्कृतिकस्य च महत्त्वस्य विषये विस्तरेण प्रकाशः कृतः। भारतीयज्ञानपरम्परायां दीपस्य प्रतीकात्मकं महत्त्वं तथा मानवजीवने ज्ञानस्य, चेतनायाः सकारात्मकतायाश्च भूमिकां तेन विशेषरूपेण प्रतिपादितम्।मुख्यातिथिरूपेण संस्कृतसंस्कृतिविकाससंस्थानस्य महिला-प्रकोष्ठस्य राष्ट्रियाध्यक्षा डॉ. अञ्जुसेठमहोदया उपस्थिता आसीत्। स्वकीयसम्बोधने तया दीपावलीपर्व भारतीयसंस्कृतेः, पारिवारिकमूल्यानां, सामाजिकसद्भावस्य आध्यात्मिकप्रगतेश्च प्रतीकम् इति प्रतिपादितम्। भारतीयसांस्कृतिकपरम्पराणां संरक्षणे संवर्धने च महिलानां महत्त्वपूर्णां भूमिकां प्रति अपि तया विशेषः बलः प्रदत्तः।

अध्यक्षीयसम्बोधने संस्कृतसंस्कृतिविकास-संस्थानस्य मध्यप्रदेशप्रान्तस्य उपाध्यक्षः डॉ. तुलसीदासपरौहामहोदयः दीपोत्सवस्य व्यापकस्य सांस्कृतिकस्य आध्यात्मिकस्य च स्वरूपस्य विषये स्वविचारान् प्रस्तुतवान्। तेन कथितं यत् एतादृशाः कार्यक्रमाः भारतीयज्ञानपरम्परायाः विषये जागरूकताम् उत्पादयन्ति तथा समाजे नैतिकमूल्यानि, सद्भावं सांस्कृतिकचेतनां च सुदृढीकुर्वन्ति।

कार्यक्रमस्य अन्ते आयोजनसचिवः, महर्षिमहेशयोगीवैदिकविश्वविद्यालयस्य वेदविभागाध्यक्षः च डॉ. आलोकचन्द्रपरिडामहोदयः धन्यवादज्ञापनं कृतवान्।

तदनन्तरं पण्डितब्रजकिशोरशुक्लेन शान्तिपाठः कृतः। तेन सह कार्यक्रमस्य समापनम् अभवत्।

दीपावलीमासमहोत्सव-२०२६ इत्यस्य अन्तर्गतं आयोजितेन अस्मिन् विशिष्टव्याख्याने वैदिकज्ञानस्य, आध्यात्मिकचेतनायाः भारतीयसांस्कृतिकमूल्यानां च महत्त्वं प्रतिपादितम्। एतादृशाः कार्यक्रमाः भारतीयज्ञानपरम्परायाः संरक्षणे, संवर्धने तथा भाविपीढीपर्यन्तं तस्याः आदर्शानां प्रसारणे महत्त्वपूर्णं योगदानं ददति।

अस्मिन् अन्तर्जालमाध्यमेन आयोजिते व्याख्याने संस्कृतसंस्कृतिविकाससंस्थानस्य पदाधिकारिणः, विश्वविद्यालयस्य प्राध्यापकाः, शोधच्छात्राः, विद्यार्थिनः तथा संस्कृतस्य भारतीयसंस्कृतेश्च अनेकानुरागिणः च सहभागितां कृतवन्तः। सर्वेषां सक्रियसहभागितया अयं कार्यक्रमः ज्ञानवर्धकः, प्रेरणादायकः सांस्कृतिकदृष्ट्या च सार्थकः अभवत्।

हाइलो-ओपन्-कन्दुकक्रीडा (बैडमिण्टन्) २०२६: पी.वी. सिन्धुः, मालविका बंसोड़, उन्नति-हुड्डा च षोडश-चक्रे स्थानम् अलभन्त

हाइलो-ओपन्-कन्दुकक्रीडा-स्पर्धायां (बैडमिण्टन्-स्पर्धायां) २०२६, भारतस्य पी.वी. सिन्धुः, मालविका बंसोड़, उन्नति-हुड्डा च स्वकीयान् प्रथम-चक्रस्य स्पर्धाः जित्वा षोडश-चक्रे प्रवेशम् अकुर्वन्। सिन्धुः अष्टाविंशति-निमेषाणां क्रीडायां संयुक्त-अरब-अमीरात-देशस्य प्रकृति-भरतं २१-१०, २१-१० इति अङ्कैः पराजितवती, यदा तु मालविका एकेन क्रीडाचक्रेण (गेम्) पश्चाद्वर्तिनी भूत्वा पुनः प्रत्यागमनं कुर्वती स्वदेशस्यैव क्रीडिकां देविका-सिहागं पराजितवती। इशारानी-बरुआ तथा अनमोल-खर्ब अपि अग्रिम-चक्रे प्रवेशं प्राप्तवत्यौ। पुरुष-एकल-स्पर्धायां किरण-जॉर्जः, लक्ष्य-सेनः च स्व-स्व-प्रथम-चक्रस्य स्पर्धाः जित्वा भारतस्य पक्षात् आह्वानं प्रस्तौष्यतः।षोडश-चक्रे मालविकायाः स्पर्धा कनाडातः वेन् यू झाङ्ग इत्यनया सह भारतीय-समयानुसारम् अद्य सायं चतुरधिक-चत्वारिंशदुत्तर-चतुर्वादनकाले भविष्यति, तदनन्तरं सिन्धोः स्पर्धा फ्रान्स-देशस्य रोजी ओक्टाविया पञ्चासारी इत्यनया सह सायं चत्वारिंशदुत्तर-षड्वादने भविष्यति। रात्रौ दशवादने जायमानायां सर्व-भारतीय-स्पर्धायां लक्ष्य-सेनस्य स्पर्धा स्वदेशीय-क्रीडकेन किरण-जॉर्जेन सह भविष्यति।

नवदेहली: राष्ट्रिय-दिव्याङ्ग-सेवा-केन्द्रेण दीपावली-मेलायाः आयोजनं कृतम्

राष्ट्रिय-दिव्याङ्ग-सेवा-केन्द्रेण नवदेहल्यां दीपावली-मेलायाः आयोजनं कृतम्। अस्मिन् देशस्य विभिन्नेभ्यः केन्द्रेभ्यः प्रशिक्षितैः दिव्याङ्गजनैः निर्मितानां हस्तशिल्पानाम् अन्यासां च वस्तूनां प्रदर्शनं कृतम्। श्रम-रोजगार-मन्त्रालयानुसारं मेलायां देहली, तिरुवनन्तपुरम्, देहरादून, भुवनेश्वर, कोलकाता, मुम्बई-स्थितानां केन्द्राणां प्रशिक्षूणां पुरातन-छात्राणां च उत्पादाः सम्मिलिताः आसन्। एतेषु उत्पादेषु जूट-वस्त्र-निर्मिताः स्यूताः, सिक्थदीपकाः (मोमबत्तिकाः), वैद्युतोपकरणानि, चित्राणि, फेनकानि (साबुन), क्रोशिया-निर्मितानि वस्तूनि, वस्त्राणि, तन्तुवाय-सूचिकर्म-वस्तूनि, काष्ठ-निर्मितानि वस्तूनि, उत्सव-सज्जा-सामग्र्यः च अन्तर्भूताः आसन्। मन्त्रालयेन उक्तं यत् अस्याः मेलायाः उद्देश्यं दिव्याङ्गजनानां उत्पादेभ्यः मञ्च-प्रदानम्, तेषां सृजनशीलतायाः अभिनन्दनम्, उत्पादानां गुणवत्तां, उपयोगितां, विपणौ च तेषां सम्भावनाः प्रति जागरुकता-संवर्धनम् अस्ति। वर्तमाने सम्पूर्ण-देशे चतुर्विंशतिः (२४) राष्ट्रिय-दिव्याङ्ग-सेवा-केन्द्राणि सन्ति।

त्रिपुराः मुख्यमन्त्री डा. माणिक्-साहा २७८ आवासान् लाभार्थिभ्यः समर्पितवान्

त्रिपुरायां 'लाइट्-हाउस्'-आवास-परियोजनायाः अन्तर्गतम् अगरतलामगरे मुख्यमन्त्री डा. माणिक्-साहा २७८ आवासान् लाभार्थिभ्यः समर्पितवान्। केन्द्रीय-आवास-नगरीय-कार्य-मन्त्रालयस्य मन्त्री मनोहर-लालः दृश्य-माध्यमेन (वर्चुअल्-माध्यमेन) कार्यक्रमं सम्बोधितवान्। सः न्यवेदयत् यत् एषा परियोजना २०१९ तमे वर्षे वैश्विक-आवास-प्रौद्योगिकी-उपक्रमस्य अन्तर्गतम् आरब्धा आसीत्, देशस्य षट्सु नगरेषु च एषा प्रवर्तिता।मुख्यमन्त्री डा. माणिक्-साहा अवदत् यत् अवशिष्टानाम् आवासानां निर्माणम् अपि शीघ्रमेव सम्पूर्णं भविष्यति। सः अकथयत् यत् एषा परियोजना जनेभ्यः सुलभानां स्थिराणां (दीर्घकालिक-सुलभानां) च आवासानां प्रदान-लक्ष्यस्य पूरणे सहायिका भविष्यति।प्रत्येकं गृहस्य क्षेत्रफलम् त्रिंशत् (३०) वर्गमीटर्, अर्थात् प्रायः विंशत्यधिक-त्रिशतं (३२०) वर्गपाद-परिमितम् अस्ति, अस्य व्ययः विंशति-लक्षं (२० लक्षं) रूप्यकाणि अस्ति। लाभार्थिभिः प्रति-गृहं (फ्लैट्) पञ्च-लक्ष-चत्वारिंशत्-सहस्रं (५ लक्ष ४० सहस्रं) रूप्यकाणि दातव्यानि भविष्यन्ति, अवशिष्टः व्ययः तु केन्द्र-राज्य-सर्वकाराभ्यां वहिष्यते।